The Brāhmī, International Multidisciplinary Research Journal

(Peer Reviewed, Referred & Open Access Journal)

Volume: 01 | Issue: 01 | Mar-May 2024 | www.thebrahmi.com

**न्यायनये शाब्दबोधविचारः एकमध्ययनम् -**

नकुल कुमार साहुः
शोधछात्रःउत्कलविश्वविद्यालयः ,

**शोधसारः-**

भारतीयज्ञानपरम्परायां संस्कृतवाङ्मये वा दर्शनस्य महत्वपूर्णमवदानं वर्त्तते । आध्यात्मिकम् आधिभौतिकम् आत्मज्ञानम्, आत्मसाक्षात्कारःमोक्षेत्यादिविषयाः दर्शने सन्ति । किं ,प्रेत्याभावः ,दुःखत्रयस्य अपसारणम् ,कर्मनिर्धारणम् , येन उपायेन सांसारिकपदार्थानां यथार्थज्ञानं भवति तदेव दर्शनम् । न्याय ? दर्शनम्नये षोडशपदार्थेषु प्रमाणस्य वर्णनं सर्वादौ भवति । कारणं मानाधीना मेयसिद्धिः इति न्यायेन प्रमेयः प्रमाणस्य अधिनमस्ति । अतः प्रमेयस्य पूर्वं प्रमाणस्य लक्षणं सूत्रकारेण क्रियते । सर्वदर्शनसंग्रहे प्रमाणस्य लक्षणमस्ति साधनाश्रयाव्यतिरिक्तत्वे सति प्रमाव्याप्तं प्रमाणम् । प्रमाज्ञानं प्रमाणं विना न सिध्यते । अतः यत्र यत्र प्रमा तत्र तत्र प्रमाणम् । प्रमाणेन प्रमेयादिपदार्थानां ज्ञानं भवति । षोडशपदार्थानां ज्ञानेन सर्वे जीवाः अनायासेन मोक्षं प्राप्यन्ते इति सूत्रकारस्य आशयः । अतः अपवर्गप्राप्ताय प्रमाणमस्ति कारणम् । तथा च वस्त्ववस्तोयोः मध्ये पदार्थापदार्थयोः मध्ये च प्रभेदः प्रमाणेन जायते । न्यायदर्शने चतुर्विधानि प्रमाणानि स्वीक्रियते अक्षपादेन गौतमेन। प्रमाणानि सन्ति प्रत्यक्षम्शब्दश्च । इन्दियाणां सन्निकर्षात् येषाम् ,उपमानम् ,अनुमानम् , नं भावति तदेव प्रत्यक्षप्रमाणम्। प्रत्अर्थानां विषयाणां वा ज्ञायक्षमिदम् अव्यपदेश्यम्व्यवसायात्मकं च । ,अव्यभिचारिः , सामान्यतोदृष्टं च । साधर्म्ययुक्तं ,शेषवत् ,पूर्ववत् -अतीन्द्रियविषयस्य ज्ञानमनुमानेन जायते । अनुमानं त्रिविधं यथा रूपेण शब्दः द्विविधः । वेदादिशास्त्राणापदार्थम् उपमानेन सिध्यते । दृष्टार्थादृष्टार्थं मुनिऋषिणाम् आप्तानाम् उपदेशवाक्यै येषां पदर्थानां ज्ञानं भवति तदेव शब्दप्रमाणम् । सूत्रकारः केवलं शब्दप्रमाणेन कथं ज्ञानप्राप्तिर्भवति तस्मिन् विषये न्यायसूत्रे वर्णनं भवति । किन्तु शब्दप्रमाणे सहायकतत्त्वानि शाब्दबोधशक्तिग्रहादिविषयान् परवर्तिनैयायिकाः सुन्दररूपेण प्रतिपादयन्ति । शब्दप्रमाणे शाब्दबोधः फलम् पदज्ञानं करणञ्च । ,शक्तिधीः सहकारिकारणम् ,तर्हि एतेषां विषयाणां ज्ञानमपरिहार्यम् । "न्यायनये शाब्दबोधविचारः "एकमध्ययनम् - इति विषयोऽयं गवेषकाणां कृते न्यैयायिकानां कृते शब्दशास्त्रीयसिद्धान्तवविषकम् अनुसन्धानक्षेत्रे सहायकं भवति आशास्यते ।

**कूटशब्दाः -**

न्यायःशक्तिश्च । ,पदम् ,शाब्दबोधः ,प्रमाणम् ,

**उपक्रमः**

दृशिर् प्रेक्षणे इति धातोः करणाधिकरणयोश्च सूत्रेण करणे ल्युट्प्रत्यये दर्शनशब्दः निष्पद्यते । भारतीयदर्शनशास्त्रस्य प्रवाहः सरणीद्वयमवलम्ब्य प्रवाहितः । यथा- आस्तिकः नास्तिकश्च । न्याय-बैशेषिकः, सांख्य-योगः, वेदान्त-मीमांसा च आस्तिकदर्शनानि । षड्-विधास्तिकदर्शनेषु न्यायदर्शनं सर्वशास्त्राणाम् उपकारकत्वेन लोकेऽस्मिन् प्रसिद्धम् । तथा च भारतीयदर्शनसाहित्यस्य प्रवेशद्वारमिव न्यायदर्शनमस्ति । सर्वासु विद्यासु न्यायशास्त्रं प्रदीप इव भासते। 'न्यायः' इति शब्दः नि-उपसर्गपूर्वकात् 'इण् गतौ' धातोः घञ् प्रत्ययेन निष्पन्नः । प्रमाणमाध्यमेन अर्थपरीक्षणं यस्मिन् शास्त्रे भवति तद् न्यायशास्त्रम् । संस्कृतसाहित्यस्योच्चतराणां ग्रन्थानां अवबोधने सहायकं भवति न्यायदर्शनम् । अतः उच्यते यत्- 'कणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्' । महर्षिः गौतमः पञ्चाध्यायत्मकं न्यायशाश्त्रं प्रणीतवान् । न्यायसूत्रे महर्षिगौतमः षोडशपदार्थानां ज्ञानेन मोक्षो भवतीति सूचितवान् । "प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्तावयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-छल-जाति-निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः ॥"

षोडशपदार्थेषु प्रथमपदार्थमस्ति प्रमाणम् । न्यायदर्शने प्रमाणं चतुर्विधम्। यथा प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्दश्च । उक्तंञ्च-

प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि ॥

अर्थापत्तिः, अनुपलब्धिः, सम्भवः, ऐतिह्यादिप्रमाणम् एषु चतुर्विधेषु प्रमाणेषु समाहितं भवति । अतः न्याये नोऽपि

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 01 | Mar-May 2024 | www.thebrahmi.com

न्यूनं नोप्याधिकं प्रमाणं स्वीक्रियते। न्यायनये प्रमाणं केवलं चतुर्विधमिति।

**शब्दः**

शब्दं प्रमाणत्वेन स्वीकृत्य न्यायदर्शने तस्य स्वरूपं प्रतिपाद्यते यथा - आप्तोपदेशः शब्द

यथार्थवक्ता आप्तः इति उच्यते । अर्थात् भ्रमादिरहितः साक्षात्कृतधर्मा यथादृष्टस्य अर्थस्य चिख्यापयिषया प्रयुक्तोपदेष्टा, साक्षात्करणमर्थस्याऽऽप्तिस्तया प्रवर्त्तते इति आप्तः। गौतमीयसूत्रप्रकाशे आप्तपदस्य निर्वचनं भवति यत्- "यथार्थज्ञानवान् अविप्रलिप्सुः यथादृष्टार्थचिख्यापयिषु स्थानकरणपाटवांश्च।" तस्य उपदेशः आप्तोपदेशः। उपदिश्यते अनेन इति उपदेशः। यः पुरुषः पदार्थस्य प्रकृतज्ञानं जानाति एवं च साक्षातनुभूतपदार्थस्य यथार्थार्थं प्रकाशयति उपदिश्यति स अस्माकं कृते आप्तः। यादृशी वस्तुस्थितिः तादृशी तदनुगुणमेव आप्तपुरुषेण उच्यते। आप्तो यथार्थः, उपदेशः शाब्दबोधो यस्मात् इति बहुव्रीहिः। शब्दत्वञ्च जातिविशेषः, तथा च यथार्थशब्दानां ज्ञानकरणत्वमर्थः इति वृत्तिकारेण विश्वनाथेनोक्तम्। आप्तवाक्यः देशकालजात्यादेः सर्वत्र सिद्धं भवति। आप्तो वाक्यं शब्दः इति तर्कसंग्रहे। वाक्यं नाम पदसमूहः। यथा गामानयेति। अत्र गां तथा च आनयति पदद्वयम्। शक्तं पदम्। तर्हि शक्तिं किए? – अस्मात् पदात् अयमर्थो बोद्धव्य इतीश्वरसङ्केतः शक्तिः।

**शाब्दबोधः -**

शाब्दबाधः किम्? शब्दात् जायमानः बोधः शाब्दबोधः। अर्थात् वाक्यार्थज्ञानमित्यर्थः। तथा च एकपदार्थे अपरपदार्थसंसर्गविषयकज्ञानमित्यर्थः। शाब्दः शब्दसम्बद्धः शब्दसमूहात्मकवाक्यजन्य वाक्यार्थलभ्यः बोधः ज्ञानं शाब्दबोधः। शाब्दबोधस्य करणं नाम असाधारणं कारणं शब्दः। शब्दं विना शाब्दबोधः न भवति। नैयायिकाः शाब्दबोधः प्रथमान्तार्थमुख्यविशेष्यकः भवतीति आमनन्ति । रामः ग्रामं गच्छति इति वाक्यात् ग्रामनिष्ठसंयोगानुकूलव्यापारानुकूलकृत्याश्रयः रामः इति शाब्दबोधः जायते। अयं शाब्दबोधः द्वेधा विभक्तः। यथा- सखण्डशाब्दबोधः अखण्डशाब्दबोधश्चेति । वाक्ये विद्यमानानां प्रकृतित्ययादीनां पृथक्तया यो बोधः जायते सः सखण्डशाब्दबोधः। यथा 'घटमानय' इत्यत्र घटपदस्य घटोऽर्थः। द्वितीयायाः कर्मत्वमर्थः। आङ्पूर्वक 'नि' धातोः आनयनमर्थः। आख्यातस्य कृतिः अर्थः। एवञ्च एकस्मात् वाक्यात् जायमानः पूर्वबोधः आकाङ्क्षादिरहितः शाब्दबोधः अखण्डशाब्दबोधः। तत्र 'घटमानय' इत्यत्र घटकर्मकानयनानुकूलकृतिमाँस्त्वमिति बोधः अखण्डशाब्दबोधः। शाब्दप्रमा तत्करणव्यापारादिसर्वस्वरूपस्य वर्णनं भवति न्याये। विश्वनाथेन उक्तं यथा-

"पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी॥"

शाब्दबोधे पदज्ञानं करणम्। करणं नाम व्यापारवद् असाधारणकारणम्। पदार्थस्य धी ज्ञानमत्र व्यापारः द्वारम्। व्यापारः नाम पदजन्यपदार्थस्मरणम् । शाब्दबोधः फलम् अर्थात् प्रमा । पदजन्यपदार्थस्मरणात्मकव्यापारे शक्तिधी पदपदार्थसम्बन्धस्य ज्ञानं सहकारिकारणमिति। शाब्दबोधार्थमादौ शब्दस्य अर्थात् पदस्य प्रत्यक्षात्मकं ज्ञानमावश्यकम्।

**पदम्-**

शक्तं पदम्। शक्तिनिरूपकत्वं पदत्वमिति पदस्य लक्षणम्। तत् पदं चतुर्विधम्। यथा- यौगिकम्, रूढम्, योगरूढम्, यौगिकरूढञ्च।

**(क) यौगिकम्-** यत्र पदे अवयवार्थ एव बुध्यते तत् यौगिकं मतम्। यथा- पाचकादिपदम्। पाचकः इत्यत्र पच इत्येकः प्रकृतिरूपोऽवयवः। ण्वुल् इत्यपरः प्रत्ययरूपोऽवयवः। उभयावयवार्थः पाककर्ता बुध्यते इति अत्र यौगिकपदम्।

**(ख) रूढम्-** यत्र अवयवशक्तिनिरपेक्षया समुदायशक्त्या बुध्यते तद् रूढपदम्। यथा गोमण्डलादिपदम्।

**(ग) योगरूढम्-** यत्र तु अवयवशक्तिविषये समुदायशक्तिरप्यस्ति तद् योगरूढम्। यथा पङ्कजादिपदम्। अत्र पङ्कजपदमवयवशक्त्या पङ्कजनिकर्तृरूपमर्थं बोधयति, समुदायशक्त्या च पद्मत्वेन रूपेण पद्मं बोधयति।

**(घ) यौगिकरूढम्-** यत्र तु यौगिकार्थरूढ्यर्थयोः स्वातन्त्र्येण बोधः तद् यौगिकिरूढम्। यथा उद्भिदादिपदम्। अत्र अवयवशक्तिज्ञानमात्रेण उद्भेदनकर्ता तरुगुल्मादिर्बुध्यते, समुदायशक्तिज्ञानमात्रेण च उद्भिदा यजेत पशुकामः इत्यत्र

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 01 | Mar-May 2024 | www.thebrahmi.com

यागविशेषः बुध्यते। अनेन प्रकारेण पदस्य चत्वारः भेदाः प्रतिपादिताः।

**शक्तिः**

पदपदार्थयोः सम्बन्धः शक्तिरुच्यते। सा चास्मात्पदादयमर्थः बोध्यव्यः इतीश्वरेच्छारूपा । शक्तिग्रहस्तु व्याकरणादितः भवति। तथा चोक्तम्-

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्यात् व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ।।

व्याकरणम्, उमनानम्, कोशः, आप्तवाक्यम्, व्यवहारः, वाक्यशेषः, विवृतिः, सिद्धपदस्य सान्निध्यम् एतानि अष्टौ शक्तिग्रहस्य प्रयोजकानि भवन्ति।

**1.व्याकरणम्-** धातुप्रकृतिप्रत्यादीनां शक्तिग्रहः व्याकरणाद्भवति । तथा च व्याकरणे रामादिप्रकृतेः अमुकार्थे शक्तिरित्यदर्शितप्रायत्वात् धातुरूपप्रकृतिरित्यर्थः बोध्यः। अथवा प्रकृतिपदं पाचकादिप्रातिपदिके लाक्षणिकं, पच् धातोः पाचकार्थत्वस्य तदुत्तरकृत्प्रत्ययस्य कर्तृत्वार्थकत्वस्य च तत्र प्रतिपादनेन व्याकरणाच्छक्तिग्रहः । वैयाकरणाः धात्वर्थमुख्यविशेष्यकशाब्दबोधं समर्थयन्ति। यथा मृगो धावति। अत्र मृगकर्तृकधावनकर्मकं प्रेरणादिविषयीभूतं त्वत्कर्तृकं दर्शनमिति । मीमांसकमतेन आख्यातार्थमुख्यविशेष्यकशाब्दबोधः । यथा देवदत्तः ओदनं पचतीत्यत्र पाककरणिकाः ओदनभाव्यिका देवदत्तकृतिरिति बोधः। नैयायिकमते तु प्रथमान्तमुख्यविशेष्यकशाब्दबोधः। यथा चैत्रः तण्डुलं पचतीत्यत्र तण्डुलनिष्टपाकानुकूलकृतिमांश्चैत्र इति।

**2.उमनानम्-** उपमानप्रमाणात् शक्तिग्रहो भवतीति। यथा गो सदृशो गवयः। कारिकावल्यां विश्वनाथपञ्चाननेन उक्तम्-

ग्रामीणस्य प्रथमतः पश्यते गवयादिकम्।
सादृश्यधीर्गवादीनां या स्यात् सा करणं मतम्॥
वाक्यार्थस्यातिदेशस्य स्मृतिर्व्यापार उच्यते।
गवयादिपदानां तु शक्तिधीरुपमा फलम्॥

**3. कोशः-** कोशात् शक्तिग्रहः भवति । स्वसमानार्थबोधकशब्दसमुहात्मकात् अमरसिंहादिकोशात् 'पिताम्बरोऽच्युतः शार्ङ्गिन्' इत्यत्र पिताम्बरादिशब्दस्य श्रीकृष्णपरमात्मनि शक्तिग्रहः।

**4. आप्तवाक्यम्-** आप्तवाक्यात् शक्तिग्रहः भवति। प्रयोगहेतुभूतयथार्थज्ञानवान् आप्तः । यथा 'कोकिलः पिकपदवाच्यः' इत्याप्तवाक्येन 'पिक' पदस्यार्थमजाननस्य बालस्य 'पिक' पदस्य कोकिलात्मकेऽर्थे शक्तिग्रहः भवति।

**5. व्यवहारः-** व्यवहारादपि शक्तिग्रहः भवति । यथा प्रयोजकवृद्धेन घटमानय इत्युक्तम् । तच्छ्रुत्वा प्रयोज्यवृद्धेन घटः आनीतः। तदवधार्य पार्श्वस्थः बालः घटानयनरूपं कार्यं 'घटमानये' ति शब्दप्रयोज्यमिति अवधारयति।

**6. वाक्यशेषः-** वाक्यशेषात् शक्तिग्रहः जायते। यथा 'यवमयश्चरुर्भवती' त्यत्र वाक्यशेषात् यवपदस्य दीर्घशूकविशेषे शक्तिः निर्णीयते। वाक्यशेषस्तु - 'वसन्ते सर्वशस्यानां जायते पत्रशातनम्। मोदमानाश्च तिष्टन्ति यवाः कणिशशालिनः।'

**7. विवृतिः-** विवरणादपि शक्तिग्रहः भवति। विवरणं तु 'तत्समानार्थकपदान्तरेण तदर्थकथनम्'। यथा घटोऽस्तीति इत्यस्य कलशोऽस्तीत्यनेन विवरणात् घटपदस्य कलशे शक्तिग्रहः।

**8. सिद्धपदस्य सान्निध्यम्-** तथैव प्रसिद्धपदस्य सान्निध्यादपि शक्तिग्रहः। यथा 'इह सहकारतरौ मधुरं पिको रौती' त्यादौ पिकपदस्य कोकिले शक्तिग्रहः।

शाब्दबोधे हेतुः-

आकाङ्क्षा, योग्यता, आसत्तिः (सन्निधिः), तात्पर्यज्ञानञ्च शाब्दबोधेः हेतुः । तथा चोक्तं विश्वनाथपञ्चाननभट्टाचार्येण- "आसत्तियोग्यताकाङ्क्षातात्पर्यज्ञानमिष्यते।"

**क. आकाङ्क्षा-** पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वम् आकांक्षा । उक्तम्- "यत्पदेन विना यस्याननुभावकता भवेत्। आकाङ्क्षा.... "। यथा गौरश्वः पुरुषो हस्तीति न प्रमाणम् आकांक्षाविरहात्। अतः आकांक्षाज्ञानं शाब्दबोधे कारणम्।

**ख. योग्यता-** एकपदार्थेऽपरपदार्थसम्बन्धः योग्यता । अर्थाबाधः बाधाभावो वा योग्यतेत्यर्थः । उच्यते “पदर्थे तत्र तद्वता योग्यता परिकीर्तिता ।” योग्यताविरहात् वह्निना सिञ्चतीति न प्रमाणम् । अत्र वह्निना सिञ्चतीत्यत्र सेककरणत्वस्य जलादिधर्मस्य वह्नौ बाधनिश्चयसत्त्वान्न शाब्दबोधः ।

**ग. आसत्तिः-** पदानामव्यवधानम् आसत्तिरुच्यते । तथा च अन्वयप्रतियोग्यनुयोगिपदयोरव्यवधानमासत्तिः । उक्तम्- “सन्निधानं तु पदस्यासत्तिरुच्यते ।” तज्ज्ञानं शाब्दबोधे कारणम् । गिरिर्भुक्तमग्निमान् देवदत्तेन इत्यादौ आसत्तिज्ञानाभावात् न शाब्दबोधः । प्रहरे प्रहरे असहोच्चारिते गाम् आनय इत्यादिवाक्ये आसत्त्यभावात् शाब्दवोधः न भवति ।

**घ. तात्पर्यज्ञानम्-** एवं तात्पर्यज्ञानमपि शाब्दबोधे हेतुः । वक्तुः इच्छा एव तात्पर्यज्ञानम् । उक्तंश्च- वक्तुरिच्छा तु तात्पर्यं परिकीर्तितम् । तात्पर्यज्ञानाभावात् ‘सैन्धवमानय' इत्यादौ क्वचित् अश्वस्य क्वचित् लवणस्य च बोधः न स्यात् । अतः शाब्दबोधार्थं तात्पर्यज्ञानमावश्यकम् ।

**उपसंहारः**

न्यायदर्शने चतुर्विधप्रमाणस्य ग्रहणं भवति। एतेषु प्रमाणेषु अन्तिमप्रमाणम्स्ति शब्दः । शब्दप्रमाणे शाब्दबोधः फलम् । शाब्दबोधस्य करणं शब्दप्रमाणम् । करणं नाम व्यापारवद् असाधारणकारणम् । वस्तुतत्त्वज्ञानाय शाब्दबोधज्ञानं नित्यान्तमावश्यकम् । कारणं वस्तुज्ञानेन अविद्यायाः विनाशं भूत्वा मोक्षप्राप्तये सुकरं भवति । मोक्षप्राप्तिः मानवानां चरमलक्षमस्ति । पुनश्च शाब्दबोधेन पदपदार्थयोः मध्ये स्थितसम्बन्धस्य अपि ज्ञानं भवति । शाब्दबोधे चतुर्विधकारणस्य अपि ज्ञानं जायते ।

सहायकग्रन्थसूची –

1. झा किशोरनाथ, “न्याय- परिचय” , चौखम्बा विद्याभवन, वाराणसी, २०१४ २.
2. झा डॉ. महेश, “न्यायसूत्रम्” , चौखम्बा संस्कृत सीरीज ऑफिस, वाराणसी, २०२१
3. झा श्रीरुद्रधर, “तर्कभाषा” , चौखम्बा संस्कृतसीरीज ऑफिस, वाराणसी, १९६९
4. शर्मणा नारायणसुनुता आत्माराम, “कारिकावली” , चौखम्बा कृष्णदास अकादमी, वाराणसी, २०१२
5. शास्त्री डॉ. गजानन, “न्यायसिद्धान्तमुक्तावली” , चौखम्बासंस्कृतसंस्थान, वाराणसी, १९८२
6. शास्त्री ढुण्डिराज, “न्यायदर्शनम्-वात्स्यायनभाष्यम्” , चौखम्बासंस्कृतसंस्थान, वाराणसी, १९७८
7. शुक्ल रामगोविन्द, “कारिकावली” , चौखम्बा संस्कृत सीरीज ऑफिस, वाराणसी, २००२
8. आचर्य प. चित्तनारायणपाठक, व्याप्तिपञ्चकम्, चौखम्बा विद्याभवन, वाराणसी, 2010
9. डा. माधव जनर्दन रटाटे, सर्वदर्श्नसंग्रहः (हिन्दी), द भारतीय विद्या प्रकाशन, वाराणसी, 2017
10. डा. माधव जनर्दन रटाटे, सर्वदर्श्नसंग्रहः, द भारतीय विद्या प्रकाशन, वाराणसी, 2022
11. वामन शिवराम आप्टे, संस्कृत-हिन्दी शब्दकोश, कमल प्रकाशन, नई दिल्ली
12. विरञ्चि नारायण साहु, न्याय ओ वैशेषिक दर्शन, ओडिशा राज्य पाठ्यपुस्तक प्रणयन ओ प्रकशन संस्था, भूवनेश्वर, 1999
13. Subash Chandra Dash, Nyaya Theory Of Language, Pratibha Prakashan, Delhi, 2009
14. Padmabhusan Acharya Baladeva Upadhyaya, Bhāratīya Darśan, Chaukhamba Sanskrit Bhawan.Varanasi, 2nd Edn 2022
15. Pandita Shree Ramagobindashukla, Kārīkāvalī, Chaukhamba Sanskrit Sirij Office, Varanasi
16. Satyamurti, The Nyāya Conception of Reasoning, Chaukhamba Sanskrit

Pratishthan, Delhi, 2015
17. Kashinath Hota, Arun Ranjan Mishra, Bibliography of Nyāya-Vaiśeṣika, Centre of Advanced Study in Sanskrit, University of Poona, 1993

1. न्या.सू.,1.1.1
2. न्या.सू.,1.1.3
3. न्या1.1.7-सू.
4. आप्तः खलु साक्षात्कृतधर्मा यथार्थदृष्टस्य चिरख्यापविषया प्रयुक्त उपदेष्टाभा.न्या-
5. आप्तः प्रकृतवाक्यार्थयथार्थज्ञानवान्1.1.7-वि.वि-
6. आप्तस्तु यथार्थवक्ता ।सं.त-
7. यथाभूतावाधितार्थोपदेष्टा आप्तः ।पदकृत्य टीका.सं.त -
8. वि1.1.7-वृ.
9. कारि81.
10. न्यायसिद्धान्तमुक्तावली।
11. कारि80-79.
12. कारि82.
13. कारि84.5.
14. कारि83.
15. कारि83.5.
16. कारि84.